ताभ्रपटलीलीनांबुवद्भंगुरम् विनाश्रेयो न ५२ भोगा इति हे बुधाः योगे मनोवचनकाय
संरोधलक्षणे बुद्धिं विदध्वं इतरद् अखिलं नृणां तु षप्रायं कथं भोगाः पंचांगाः मेघवितानमध्य

For Private and Personal Use Only

विलसत्सौदामिनीचंचलाः मेघवितानमध्ये विलसंती यासौदामिनी विद्युत्तद्वच्चंचलाश्चप
लाः चान्यदासुर्जीवितंवायुविघट्टिताभ्रपटलीलीनांबुवद्भंगुरंवायुविघट्टितायाभ्रपटली
तत्रलीनंयदंबुपानीयंतद्वद्भंगुरंविनाशशीलंतत्तुभृतांप्राणिनांयौवनलालनातारुण्यातिपा

लोलायौवनलालनातनुभृतामित्याकलय्यद्रुतंयोगेधैर्यसमाधिसिद्धिसु
लभेबुद्धिंविदध्वंबुधाः ५४ पुण्येग्रामेवनेवामहतिसितपटच्छन्नपालींकपा
लीमादायन्यायगर्भद्विजमुखहुतभुक्धूमधूम्रोपकंठम्

लनालोलाचंचलावर्त्त
तेइतिआकलय्य इतिविचिंत्यद्रुतंशीघ्रंयोगेमनोविदध्वंकिंभूतेयोगेधैर्य्यसमाधिसिद्धिसुल २७
भे ५४ पुण्येतिमानीप्राणीअभिमानीपुमान्क्षुधार्तः सधन्यः सुखंवरंउदरदरीपूरणायद्वारंद्वारं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वृत्तैः किं कृत्वा महति ग्रामे अथवा वने कपालीं कर्पूरं आदाय गृहीत्वा कथं भूतां कपालीं सितपटच्छन्नपालीं
सितपटेन श्वेतवस्त्रेण च्छन्ना आच्छादिना पाली यस्याः सा तां किं भूते ग्रामे वा वने पुण्ये पवित्रे किं भू
तं द्वारं न्यायगर्भ द्विजमुखहुत भुक् धूमधूम्रोपकंठं न्यायगर्भेण न्यायशास्त्ररूपवितेन द्विजमुखेन हु

द्वारं द्वारं प्रवृत्तो वरमुदर दरीपूरणाय क्षुधार्त्तो मानी प्राणी स धन्यो न पुनरनुदि
नं तुल्यकुल्येषु दीनः ५५ चांडालः किमयं द्विजातिरथवा शूद्रोथ किं तापसः किं
वा तत्वनिवेशपेशलमतिर्योगीश्वरः कोपि किम्

त भुक् वैश्वानरस्तस्य धूमा मनुष्ये
धूम्रस्तेन व्याप्तं उपकंठं यस्य तत् ५५ चांडालेति अत एव योगिनः पथि मार्गे जनैः एवं भाष्य
माणाः न क्रुद्धा यास्यंति नैव तुष्टमनसो यास्यंति किं भूतैः जनैः इत्यनेन प्रकारेण उत्पन्नविकल्पा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जल्पमुखरैः इतिकिं अयंकिं चांडालः वाथवाद्विजोब्राह्मणः अथवाशूद्रः अथकिंतापसः वा थवायोगीश्वरः किंभूतोयोगीश्वरः तत्वानिवेशपेशलमतिः तत्वानिवेशे पेशलामनोज्ञामतिर्यस्या सौएवंविधानिर्विकल्पास्तएवधन्याः ५६ सखेति हे सखे हे मित्रतएवधन्याः ये एवंप्रकारेण

इत्युत्पन्नविकल्पजल्पमुखरैःसंभाष्यमाणाजनैर्नक्रुद्धाःपथिनैवतुष्टमनसो
यांतिस्वयंयोगिनः ५६ सखेधन्याःकेचित्त्रुटितभवबंधव्यतिकरावनांतेचि-
त्तांतर्विषमविषयाशीविषगताः

रात्रिंनयंते किंभूतास्तेसुकृतचयचित्तैकशरणाः

सुकृतानांचयः सुकृतचयश्चित्ते एकंशरणंयेषांतेसुकृतचयचित्तैकशरणाः पुनः किंभूताः त्रु टितभवबंधव्यतिकराः त्रुटितोभवबंधस्यव्यतिकरोयेषांते वनांतेवनमध्ये चित्तांतर्विषमविष



For Private and Personal Use Only

याशीविषगवाः चित्तांतर्मानसमध्येविषमोयोविषयएवआशीविषः दृष्टिविषोरगोगतोयेषांते
वाविषमविषयाशीर्विगालिनाः पाठः किंभूतांरात्रिंशरच्चंद्रज्योत्स्नाधवलगगनाभोगसु
भगां शरच्चंद्रस्यज्योत्स्नयाशरत्कालीनचंद्रमसः कांत्याधवलेनगगनाभोगेण विस्तारेण सु

शरच्चंद्रज्योत्स्नाधवलगगनाभोगसुभगांनयंतेयेरात्रिंस्फुरत्तनयाचित्तेकशर
णाः ५७ एतस्माद्विरमेंद्रियार्थगहनादायासकादाश्रयात्श्रेयोमार्गमशेषदुः
खशमनव्यापारदक्षंक्षणात्

भगा मनोज्ञासा शरच्चंद्रज्योत्स्नाधवलिनाम् ५७ एत
स्मादितिहेचेतः हे आत्मन् अधुनाप्रसीद प्रसादंकुरु एतस्मादिंद्रियार्थगहनात्विरमकिंभूता
दिंद्रियार्थगहनात् आयासकारादाश्रयात् कुत्सितआश्रयः कदाश्रयः कदाश्रयस्यभावःकादाश्रयः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आयासेनकादाश्रयः आयासकादाश्रयस्तस्मात्क्षणात् शांतंभाव मुपैहिकिंभूतंशांतंभावंश्रे
योमार्गंपुनः किंभूतं शांतं भावं अशेषदुःखशमनव्यापार दक्षंअशेषाणियानि दुःखानितेषां
शमनव्यापारेदक्षः हेचेतः निजांकल्लोल लोलांगतिंसंत्यजपरिहर भूयः भंगुरांविनश्वरांभ

शांतंभावमुपैहिसंत्यजनिजांकल्लोललोलांगतिंमाभूयोभजभंगुरांभवरतिं
चेतःप्रसीदाधुना ५८ पुण्यैर्मूलफलैःप्रियेप्रणयिनिवृत्तिंकुरुष्वाधुनाभूश-
य्यानववल्कलैरकरुणैरुत्तिष्ठयामोवनम्

वरतिंमाभजसेवस्व एभिर्लक्षणैः संसा
रस्यबुद्धिरेवस्यात्तस्मात्कारणात्तांमाभजेत्यर्थः ५८ पुण्यैरितिहे प्रणयिनिहेप्रियेउत्तिष्ठवनंयामः
यत्राविवेकमूढमनसांईश्वराणांधनवतांनामापिनश्रूयतेकिंभूतानामीश्वराणांक्षुद्राणांतुच्छानांपुनः



For Private and Personal Use Only

किंभूतानांईश्वराणांचित्तव्याधिविवेकाविव्हलगिरांचित्तव्याधीनांअविवेकेनविव्हलागीर्वाणीयेषां
तेषांहेप्रियेपुण्यैःपवित्रैःमूलफलैःप्रीतिंकुरुष्वअन्यच्चभूशय्यानववल्कलैःप्रीतिंकुरुष्वकिंभू
तैर्नववल्कलैःअकरणैःक्रियतेअनेनेतिकरणंनकरणंअकरणंतैःकरणक्रियारहितैः५९मोहमि

क्षुद्राणामविवेकमूढमनसांयत्रेश्वराणांसदाचित्तव्याध्यविवेकविव्हलगिरां
नामापिनश्रूयते५९मोहंमार्जयतामुपार्जयरतिंचंद्रार्धचूडामणौचेतःस्वर्गतरं
गिणीतटभुवामासंगमंगीकुरु

तिहेचेतःमोहंमार्जयतांदूरीक्रियतांरेप्राणिन्चंद्रार्द्धचू
डामणौरतिंतोषमुपार्जयरेचेतःस्वर्गतरंगिणीतटभुवांआसंगंसंगतिमंगीकुरु नोस्माकंवा
थवावीचिषुकल्लोलेषुप्रत्ययोविश्वासःचान्यज्जलबुद्बुदेषुवर्षावारिपृष्टेषुकःप्रत्ययःचान्यत्त

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



डिल्लेरवास्कसौदामिनीषुकः प्रत्ययः यथा एतेषु स्थानेषु नोस्माकं प्रत्ययो नास्ति तथा जीवितेषु ६०

१० अग्रे इति रे ने नो यदि एवमास्तितदा भवरसास्वादने लंपटत्वं कुरु एवं किं यदितवाग्रंस्फीनंप्रत्तुर २

गीतं भवति अन्यच्चापार्श्वतोदाक्षिणात्यादाक्षिणदेशीयाः सरसकवयो भवंति अन्यच्चपृष्ठेनाम

नोवाचीन्निषुबुद्बुदेषुचनतडिल्लेरवासुचस्त्रीषुचज्वालाग्रेषुचपन्नगेषुचसरि
द्वेगेषुचप्रत्ययः ६० अग्रेगीतंसरसकवयःपार्श्वतोदाक्षिणात्याःपृष्ठेलीलाव
शपरिणातिश्चामरग्राहिणीनाम् यद्यस्त्येवंकुरुभवरसास्वादनेलंपटत्वंनोचे
च्चेतःप्रविशसहसानिर्विकल्पेसमाधौ ६१

रग्राहिणीनांसुंदरीणांलीलावशपरिणाति- ३०
श्चभवतियदेवंविधंसौख्यंभवतिनदासंसारंकुरु हेचेतः चेदेवंनतदासहसानिर्विकल्पेसमाधौ
प्रविशप्रवेशंकुरु ६१

For Private and Personal Use Only

।विरमेति हे बुधाः योषित्संगात्सुखाद्विरमत विरतिं भजत किंभूतान् सुखान् क्षणभंगुरात् करुणा मैत्री प्रज्ञा वधूजन संगमं कुरुत विदधत करुणा च मैत्री च प्रज्ञा च करुणा मैत्री प्रज्ञा सैव वधूजन-स्तस्य संगमः करुणा मैत्री प्रज्ञा वधूजन संगमस्तं खलु निश्चितं स्तन मंडलं अथवा श्रोणी बिंबनि

विरमत बुधा योषित्संगात्सुखान् क्षणभंगुरान् कुरुत करुणा मैत्री प्रज्ञा वधू-
जनसंगमम् न खलु नरके हाराक्रांतं घनस्तनमंडलं शरणमथवा श्रोणीबिं-
बं रणन्माणिमेखलम् ६२

तं बिंबं शरणं कथंभूतं स्तनमंडलं हाराक्रांतं हार कि-भूषितं पुनः कथंभूतं श्रोणीबिंबं रणन् माणि मेखलं रणंती शब्दाययाना मणिमेखला यस्मिंस्त-त्रणन् माणि मेखलम् ६२

६ ६ ६ ६ ६

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्राणोनि हे आत्मन् अनुपहतविधिः श्रेयसां पुरुषाणां एव पंथान उपहतः ननिराकृतअनुपह
तः अनुपहतेनविधिना मार्गेण श्रेयो येषां ते अनुपहतविधिश्रेयसस्तेषां मुक्तानामित्यर्थः तेषामे
षो मार्गः कः एष मार्गः प्राणाघातान्निवृत्तिः जीवहिंसाविरमः परधनहरणे परद्रव्यापहारे संयमः

प्राणाघातान्निवृत्तिःपरधनहरणेसंयमःसत्यवाक्यंकालेशक्त्याप्रदानंयुवतिज
नकथामूकभावःपरेषाम् तृष्णास्त्रोतोविभंगोगुरुषुच्च विनयःसर्वभूतानुकंपासामा
न्यःसर्वशास्त्रेष्वनुपहतविधिःश्रेयसामेषपंथा ६३

परिहारः पुनः किं सत्यवाक्यं पुनः किं
कालेशक्त्याप्रदानं पुनः किं परेषां युवतिजनकथामूकभावः पुनः किं तृष्णाश्रोतोविभंगः लोभप्रवा
हविच्छेदः चान्यद्गुरुषु विनयः सर्वभूतानुकंपा सर्वप्राणिदया सर्वशास्त्रेषु सामान्यः समानभावः मोक्ष
मार्गेणामेषमार्गः ६३





For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मानरिति हे मानलक्ष्मि कंचिद्दापरं भजस्व मत्कांक्षिणी मास्मभूः माभूयाः वयं भोगेभ्यो न स्पृहयालवः नेच्छवः निस्पृहाणां निराहाणां त्वं कासि वयं भिक्षासक्तुभिरेव संप्रतीदानीं वृत्तिं दिनगतजीविकां समीहामहे वांछामहे क्क सति सद्यस्तत्कालं पूतपलाशपत्र पुटिकापात्रे पवित्रीकृते यद्येवम-

मानलक्ष्मि भजस्व कंचिदपरं मत्कांक्षिणी मास्मभूर्भोगेभ्यः स्पृहयालवो नहि वयं
का निस्पृहाणामसि सद्यःपूतपलाशपत्रपुटिकापात्रे पवित्रीकृते भिक्षासक्तुभि
रेव संप्रतिवयं वृत्तिं समीहामहे ६८ यूयं वयं वयं यूयमित्यासीन्मतिरावयोः

स्माकं स्थितिस्तदा वयं त्वया किं कुर्म्मः ६८ यूयमिति हे मित्र पूर्वं आवयोः तव ममेति भेदबुद्धिरासीत् कथं यूयं भवंतः वयमेव वयमिति भेदबुद्धिरासीत् अधुना किं जातं निमित्तं येन

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न यूयमेव वयं वयमेव यूयमिति अभेदबुद्धिर्जाता ६५ बालेति हे बाले हे सुंदरि तावकीनं लीलामुकुलितं अमी मंथरा दृष्टिपाता अस्मासु किं क्षिप्यंते विरमत एष ते तव श्रमो व्यर्थो निरर्थ-

किंजातमधुनाभिन्नयेन यूयं वयं वयम् ६५ बाले लीलामुकुलितममी
मंथरा दृष्टिपाताः किं क्षिप्यंते विरमत यतो व्यर्थ एष श्रमस्ते संप्रत्यन्येव
यमुपरतं बाल्यमास्थावनांते क्षीणो मोहस्तृणमिव जगज्जालमालोकयामः

६६

कः संप्रति वयं अन्ये तेन भवामः अस्माकं बाल्यमुपरतं अस्माकमास्था वनांते कथं क्षीणः मोहो गतः इदं जगज्जालं तृणमिव तुच्छं विलोकयामः ६६ ७ ७ ७ ७



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इयमिति इयं बाला मां प्रति चक्षुर्नेत्रं अनवरतं निरंतरं किं क्षिपति कथंभूतं नेत्रं इंदीवरदलप्र
भाचोरं इंदीवरस्य कमलस्य दलं इंदीवरदलं तस्य प्रभां चोरयतीति इंदीवरदलप्रभाचोरं अन

इयं बाला मां प्रत्यनवरतमिंदीवरदलप्रभाचोरं चक्षुः क्षिपति किमभिप्रेतम
नया गतो मोहोऽस्माकं स्मरकुसुमबाणव्यतिकरज्वरज्वालाशांता तदपि न वरा
कीं विरमति ६७ रम्यं हर्म्यतलं न किं वसतये श्राव्यं न गेयादिकं किं वा प्राणसमा
समागमसुखं नैवाधिकं प्रीतये

याकिमाभिप्रेतं किं वांछते अस्माकं मोहो गतः स्मरकुसु
मबाणव्यतिकरज्वरज्वालाशांता वराकी तदपि न विरमति ६७ रम्येति संतः सत्पुरुषा वनांतं गताः
किमिति संभावनायां तेषां वसतये निवासाय हर्म्यतलं रम्यं नाभूत् किं न तथापि संतो वनांतं गता वनं-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सेवयामासुः॥ किं नूद्भ्रांतपतत्पतंगपवनव्यालोलदीपांकुरच्छायाचंचलं सकलं जीवलोकं आकल
य्य विनित्यहृदये ज्ञात्वा इत्यर्थः ६८ किं कंदा इति यत्तु खलानां दुर्ज्जनानां मुखानि वीक्ष्यंते विलो-
क्यंते यत्तदोर्नित्यसंबंधः तत्कंदरेभ्यः कंदाः प्रलयमुपगताः क्षयं जग्मुः वाथवा गिरिभ्यः पर्वते

किंनूद्भ्रांतपतत्पतंगपवनव्यालोलदीपांकुरच्छायाचंचलमाकलय्य सकलं सं
तो वनांतं गताः ६८ किं कंदाः कंदरेभ्यः प्रलयमुपगता निर्झरा वा गिरिभ्यः प्रध्व
स्ता वा तरुभ्यः सरसफलभृतो वल्कलेभ्यश्च शाखाः

भ्यः निर्झराः क्षयमुपगताः वा
थवा वल्कलेभ्यस्तरुभ्यः सरसशाखाः प्रध्वस्ता विनाशमुपजग्मुः कथंभूताः शाखाः सरसफल ३३
भृतः सरसानि फलानि बिभ्रतीति किं खलानां प्रसभं यथा भवति उपगतप्रश्रयाणां प्रोल्लसद्भ्रू-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

किंभूतानि सुखानि दुःखोपात्ताल्पवित्तस्मयवशपवनानर्त्तितभ्रूलतानि दुःखेनोपात्तं उपार्ज्जितंयद
ल्पवित्तं तस्यस्मयवशपवनेनासमंताद्भावेननर्तिताभ्रूलतायैःस्तानि॰ ६९ गंगेति मनुष्यायु
त्सावमान परपिंडरतावर्त्तनेनात्किंहिमवतः स्थानानिपलयंगतानि किंभूतानि हिमवतः स्थाना-

**वीक्ष्यंतेयन्सुखानिप्रसभमुपगतप्रश्रयाणांखलानांदुःखोपात्ताल्पवित्तस्मयव
शपवनानर्तितभ्रूलतानि ६९ गंगातरंगकणशीकरशीतलानिविद्याधराध्युषित
चारुशिलातलानि**

नि गंगातरंगकणशीकरशीतलानि गंगायास्तरंगाः गंगातरंगास्ते
षां कणशीकरैः शीतलानि गंगातरंगकणशीकरशीतलानि पुनः किंभूतानि स्थानानिवि
द्याधराध्युषितचारुशिलातलानि विद्याधरैरध्युषितानि अधिष्ठितानि चारूणि शिलातलानि

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



येषांनानि एवंविधस्थानानिन्वे तृस्युक्तदापरातिरस्कारपिंडरताः नराः किंभवेयुः एनावता परावमाना-
न्येवस्थानानिसंचितानि ७० यदेति यदाश्रीमान्मेरुः युगांताग्निनिहतोनिपतातिसमुद्राः शुष्यंति
किंभूताः समुद्राः प्रचुरनिकरग्राहानिलयाः प्रचुराश्चतेनिकराः समूहाः ग्राहास्तेषांग्राहानांजलचरजी

स्थानानिकिंहिमवतःप्रलयंगतानियत्सावमानपरपिंडरतामनुष्याः ७०यदामेरुः
श्रीमान्निपततियुगांताग्निनिहताःसमुद्राःशुष्यंतिप्रचुरनिकरग्राहनिलयाः धरा
गच्छत्यंतंधराणिधरपादैरपिधृताशरीरेकावार्त्ताकरिकलभकाराग्रचपले ७१

वानांनिलयाः येषुतेप्रचुरनिकरग्राहनिलयाः अपिपुनः धरावसुंधराअंतंगच्छातिविलयंगच्छतिकिं
भूताधराधराणिधरपादैर्धृतापि अवलंबितातदा शरीरे कावार्त्ताकिंभूतेशरीरेकरिकलभकाकाग्रचपलेक
रिकलभानांकाराग्रवच्चपलंतस्मिन ७१ ७



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एकाकीति हे शंभो अहं तादृशः कदा भविष्यामि कथंभूतोहं एकाकी अद्वितीयः पुनः किंभूतः निस्पृहः पुनः किंभूतः शांतः पुनः किंभूतः पाणिः पात्रं भांडं यस्य सः पुनः कथंभूतः दिगंबरः दिशः एव अंबरं वस्त्रं यस्यासौ पुनः किंभूतः कर्मनिर्मूलनक्षमः कर्मणां निर्मूलनं कर्मनिर्मूलनं तत्रक्षमः कर्मनिर्मूलनक्षमः ७१

एकाकी निस्पृहः शांतः पाणिपात्रो दिगंबरः कदा शंभो भविष्यामि कर्मनिर्मूलनक्षमः ७१ प्राप्ताः श्रियः सकलकामदुघास्ततः किं दत्तं पदं शिरसि विद्विषतां ततः किम् सन्मानिताः प्रणयिनो विभवैस्ततः किं कल्पं स्थितं तनुभृतां तनुभिस्ततः किम् ७२

प्राप्ता इति श्रियो लक्ष्म्यः प्राप्तास्ततः किंभूताः श्रियः सकलकामदुघाः सर्वमनोरथदोग्ध्र्यः विद्विषां शिरसि मस्तके पदं दत्तं ततः किं प्रणयिनः स्नेहिनाः विभवैः धनैः सन्मानितास्ततः किं तनुभृतां प्राणिनां तनुभिः शरीरैः कल्पं कल्पांतं यावत् स्थितं प्राणिनां ततः किं एतस्य निर्ममतैव वरम् ७२ ७८

For Private and Personal Use Only

७४ भक्तिरिति अतःपरं किं वैराग्यमस्ति तात्किं भक्तिर्भवेम हेशेअन्यच्च हृदिस्थं प्राणिनामंतस्थं मरणजन्मभ
यं अन्यच्च बंधुषु स्नेहोन अन्यच्च मन्मथजाः कामोद्भवा विकाराः न अन्यच्च वनांताः विजनाः जनरहिताः किं

जीर्णाकंथाततः किं सितममलपटं पट्टसूत्रंततः किं एकाभार्य्याततः किं हयकरिसुगणैरा
वृतोवाततः किम् भक्तंभुक्तंततः किं कदशनमथवा वासरांते ततः किं व्यक्तज्योतिर्नवांत
र्मथितभवभयं वैभवं वाततः किम् ७४ भक्तिर्भवे मरणजन्मभयं हृदिस्थं स्नेहोन बंधुषु
नमन्मथजाविकाराः संसर्गदोषरहिताविजनावनांतावैराग्यमस्ति किमतः परमार्थ-
नीयम् ७५

भूतावनांताः संसर्गदोषरहिताः संसर्गात् दोषः संसर्गदोषस्तेन रहिताः संसर्गदोष
रहिताः अतःपरं वैराग्यात्किमपि नास्ति किंभूतं वैराग्यं परमार्थनीयम् परमनत्तसुखम् ७५ ७



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तस्मादिति हे जनाः यदि यूयं चेतनास्थत तस्मा ब्रह्म वांछत कथंभूतं ब्रह्म अंतरहितं अजरं जराव
र्जितं पुनः किं ब्रह्म परमं विकासि यस्य परब्रह्मणः इमे भवनाधिपत्यभोगादयः आनुषंगिणो भवं-
ति अनुयायिनो वर्त्तंते किंभूताः भवनाधिपत्यभोगादयः कृपणलोकमता रक्षोजनाविभ्रमाः ७८

तस्मादनंतमजरं परमं विकेकं तद्ब्रह्म वांछत यदि किमेभिरसाद्विकल्पैः यस्यानुषंगिण
इमे भवनाधिपत्यभोगादयः कृपणलोकमता भवंति ७८ पातालमाविशसि यासि
नभो विलंघ्य दिग्मंडलं भ्रमसि मानसचापलेन

पातालमिति रे मूढ पातालमाविश-
सि अन्यच्च नभः आकाशं विलंघ्य यासि अन्यच्च दिग्मंडलं भ्रमसि केन मानसचापलेन मानसस्य चा
पलं तेन जातु कदाचित् भ्रांत्या तद्ब्रह्म कथं न स्मरासि येन ब्रह्मणा निर्दोषं निर्मोषि सुखं किं प्राप्नोषि किं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ब्रह्म आत्मनीतं आत्मनिहितं पुनः किं विमलं निर्मलम् १७ रात्रिरिति अहोऽइति दुःखे अमुना एवंविधेनसंसारेणकदर्थिताः मोहान्मौढ्यात्कथं नलज्जामहे कैः व्यापारैः किंभूतैः व्यापारैः पुन रुक्त भुक्त विषयैः पुनर्विहितानि पुनरुक्तानि यानि भुक्तानि भोजनानि अन्यच्च विषयाः पुनः पुन

भ्रांत्यापिजातुविमलंकथमात्मनीतं नब्रह्मनस्मरासि निर्वृतिमेषियेन १७ रा त्रिःसैव पुनः स एव दिवसो मत्वाबुधाजंतवो धावंत्युद्यमितस्तथैव निभृतः प्रारब्ध तत्तत्क्रियाः

रुक्ताः तेबुधाः पंडिताः जंतवः प्राणिनः उद्यमिनः उद्यमवंतो धावंति किं भूताः जंतवः तथैव पुनः पुनर्निभृत प्रारब्ध तत्तत्क्रियाः वारंवारं भृताप्रारब्धातत्तत्क्रियायैस्ते किं कृत्वा तां रात्रिं मत्वा चान्यत्पुनस्तथैव दिवसं मत्वा ज्ञात्वा यतः पुनारजनी पुनरपि दिवसः पु-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नरपि दिवसः पुनरपि सायं पुनरपि वर्षं पुनरपि वृद्धः पुनरपि बालः पुनरपि याति समेति च कालः एवंविधं कालस्य स्वरूपं ज्ञात्वा तस्मात्संसारात् द्विरक्तिरेव न भवतीति व्रीडा ७८ महीनिशांतो

**व्यापारैः पुनरुक्तभुक्तविषयैरेवंविधेनामुना संसारेण कदर्थिताः कथमहो मोहान्न लज्जामहे ७८ मही रम्या शय्या विपुलमुपधानं भुजलता विताने चाकाशं व्यजनमनुकूलोयमनिलः**

मुनिः सुखं यथा भवति तथा शेते यस्य मुनेः मही शय्या पृथ्वीशयनं यस्य मुनेर्विपुलं उपधानं गेंडुकं चान्यादि वितानं चंद्रोदयः आकाशं अयनमनुकूलः शीतलः पवनः व्यजनः तालवृंतः चान्यच्चंद्रः स्फुरद्दीपः चान्यादि रातिवनिता संमं प्रति उदितः मु-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निः कइवनृपइव यथानृपः महीशय्यापृथ्वीशयनशय्योभवति अन्यच्च विपुल उपधानोभ
वति विस्तीर्णगंडुकोभवतिचान्यदाकाशंप्रति मस्तकोपरि विनानं भवतिचान्यच्च जनानिलेन
वीजितोभवति अन्यच्चस्फुरद्दीपोभवति अन्यच्चवनितासंगंप्रति उदितोभवति किंभूतोमुनिः

स्फुरद्दीपश्चंद्रोविरतिवनितासंगमुदितः सुखंशांतःशेतेमुनिरतनुभू
तिर्नृपइव ७९ त्रैलोक्याधिपतित्वमेवविरसंयास्मिन्महाशासनेतल्ल
ब्ध्वासनवरूममानघटनेभोगेरतिंमाकृथाः

चान्यन्नृप अतनुभूतिः अतन्वी
भूतिर्विभूतिर्यस्य पक्षेलक्ष्मीः ७९ त्रैलोक्येति हे आत्मन् तत्परब्रह्मलब्ध्वा भोगे ३७
रतिंमाकृथायास्मिन्परब्रह्मणि एवनिश्चयेन त्रैलोक्याधिपतित्वंविरसंवर्ततेकिंभूतेभोगे आ

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सनवस्त्रमानघटने आसनं सिंहासनं स्त्रखासनादि वस्त्राणि चीरांशुकपट्टदुकूलादीनिमा
नं महत्त्वास्मित्वमानादि तेषां घटनं आसनवस्त्रमानघटनं तस्मिन् एवंविधे भोगेकार
तिः कोपि संभोगः एकएव परब्रह्मानित्योदितः सन् उज्जृंभनेयत्स्वादात् यस्यब्रह्मणोरस

भोगः कोपि स एक एव परमो नित्योदितो जृंभते यत्स्वादाद्विरसा भ
वंति विषयास्त्रैलोक्यराज्यादयः ८० किं वेदैः स्मृतिभिः पुराणपठनैः
शास्त्रैर्महाविस्तरैः स्वर्गग्रामकुटीनिवासफलदैः कर्मक्रियाविभ्रमैः

स्वादात् त्रैलोक्यराज्यादयो विषया विरसा भवंति मोक्षदायकत्वात् ८० किमिति वेदैः किंस्मृ-
तिभिः किंपुराणपठनैः किंशास्त्रैः किंकिंभूतैः शास्त्रैर्महाविस्तरैः महान् विस्तारो येषां ते तैः कु-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मंक्रियाविभ्रमैः किंभूतैः स्वर्गग्रामकुटीनिवासफलदैः स्वर्गग्रामस्यकुटीस्वर्गग्रामकुटीतस्यां 
निवासफलं ददतीतिस्वर्गग्रामकुटीनिवासफलदाः तैः एकंस्वात्मानंदपदप्रवेशकलनंस्वकी 
यो योसौ आत्मास्वात्मा तस्य यदानंदपदंस्वात्मानंदपदंस्थानं तस्मिन् यः प्रवेशः तस्य कलनं

**मुक्त्वैकंभवबंधदुःखरचनाविध्वंसकालानलंस्वात्मानंदपदप्रवेशकलनं**
**शेषावणिक्वृत्तयः ८१**

ज्ञानं पुनः कथंभूतं भवबंधदुःखरचनाविध्वंसकालानलं भवस्यसंसारस्ययोबंधः तस्ययानि दुःखानितेषांविध्वंसोनाशः तद्विषये कालानलं प्रलयाग्निं एतादृशं एकंज्ञानं मुक्त्वात्यक्त्वा शेषैर्वेदादिभिः किं न किमपीत्यर्थः शेषाः क्रिया वणिक् वृत्तयो वणिगाचाराः ८१ 

७ ७ ७ ७

For Private and Personal Use Only

आयुरिति हे उत्तमाः ब्रह्मणिपर ब्रह्माणि आसक्तचित्ता भवतयूयंकिं कर्त्तुंभवभयांभो धि पारंतरी तुंभव भयांभोधेः पारः भवभयांभोधिपारस्तं शेषंसमस्तमस्थिरंकिंकिं आयुः

आयुःकल्लोललोलेकतिपयदिवसस्थायिनीयौवनश्रीरर्थाःसंकल्पकल्पा
घनसमयतडिद्विभ्रमाभोगपूराः कंठाश्लेषोपगूढंतदपिचनचिरंयत्प्रि
याभिःप्रणीतंब्रह्मण्यासक्तचित्ताभवतभवभयांभोधिपारंतरीतुं ८२

कल्लोललोलं समुद्रकल्लोलचपलंयौवनश्रीः कतिपयदिवसस्थायिनी कतिपयदिवसान् स्थातुं शील मस्याः कतिपयदिवसस्थायिनी अर्थाः संकल्पकल्पाः संकल्पतुल्या भोगपूराः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



घनसमयनाडिंद्विभ्रमाः घनसमयनाडिंद्वता विभ्रमो येषां ते घनसमयनाडिंद्विभ्रमाः प्रिया 
भिः प्रणीतं यत्कंठाश्लेषोपगूढं तदपि चनाचिरं तस्मात्कारणात्परं ब्रह्म एव शाश्वतम् ८२ ब्र 
ह्मांडमिति मनस्विनो जितेंद्रियस्य ब्रह्मांडमंडलीमात्रं किं लोभाय जायते अपितु न ब्रह्मांडस्य

ब्रह्मांडमंडलीमात्रं किं लोभाय मनस्विनः शफरीस्फुरितेनाब्धेः क्षुब्ध
ता जातु जायते ८३

मंडली ब्रह्मांडमंडली सैव मात्रा यस्य तत् अब्धेः समुद्रस्य शफ
री स्फुरितेन मात्स्यिकावाल्गितेन जातु कदाचित् क्षुब्धता क्षोभता जायते अपितु न तथा मनस्वि 
नः पुरुषस्य ब्रह्मांड मंडलीमात्रं लोभाय न जायते ८३ ७ ७ ७

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यदेति यदायास्मिन् प्रस्तावे अज्ञानं आसीत्तदा इदमशेषं जगदपि मया नारीमयं दृष्टं किंभूत
मज्ञानं स्मरतिमिरसंस्कारजनितं स्मरस्य कंदर्पस्य यत्तिमिरं अंधकारं तस्य संस्कारेण पूर्वभवोद्भ
वपरिणामेन जनितं इदानीं सांप्रतं अस्माकं समीभूता दृष्टिः समतापरिणामेनालंकृतं त्वेनः त्रिभु

यदासीदज्ञानंस्मर तिमिरसंस्कारजनितंतदादृष्टंनारीमयमिदमशेषंजगद
पि इदानीमस्माकंपटुतरविवेकांजनजुषांसमीभूतादृष्टिस्त्रिभुवनमपिब्रह्मतनुते ८४

वनमपिब्रह्मतनुते परब्रह्मस्वरूपं विस्तारयति किंभूतानामस्माकं पटुतरविवेकांजनजुषां प्रकृ
ष्टः पटुतरो योसौ विवेकः पटुतरविवेकः पटुतरविवेकांजनेन जुषः पटुतरविवेकांजनजुषस्तेषां
अथ यथास्थिन संसारस्यस्वरूपं पश्यापः ८४ ५ ६ ६

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





रम्याइति चंद्रमरीचयो रम्याः वनांतस्थली रम्या किं भूता स्थली तृणवती शाद्वला साधुसमागमो
रम्यः शमसुखं रम्यं काव्येषु कथा रम्या अन्यच्च प्रियाया मुखं रम्यं किं भूतं मुखं कोपोपाहित बाष्पबिंदु

रम्याश्चंद्रमरीचयस्तृणवती रम्या वनांतस्थली रम्यः साधुसमागमः शमसुखं का
व्येषु रम्याः कथाः कोपोपाहितबाष्पबिंदुतरलं रम्यं प्रियाया मुखं सर्वं रम्यमनित्य
तामुपगते चित्तेन किंचित्पुनः ८५ भिक्षाशी जनमध्यसंगरहितः स्वायत्तचेष्टः सदा
दानादाननिरक्तमार्गनिरतः कश्चित्तपस्वी स्थितः

तरलं कोपोपाहितं कोपेन निवेशि
तं यद्बाष्पबिंदुस्तेन तरलं चंचलं मुखम् पुनः अनित्यतामुपगते संसारे चित्ते सर्वं रम्यं न किंचि
त् ८५ भिक्षेति एवंविध तपस्वीजनः कश्चिद्विरलः स्थितो वर्त्तते कीदृशो जनः भिक्षाशी भिक्षा ४०

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भोजनः पुनः कीदृशः जनमध्यमंगरहितः पुनः कीदृशः सर्वदास्वायत्तचेष्टः स्वाधीनमानसपरि
णामः पुनः कीदृशः जनः दानादानाविरक्तमार्गनिरतः दानंचादानंच दानादाने तयोर्विरक्तमार्गे निर
तः पुनः कीदृशः रथ्याक्षीणविशीर्णजीर्णवसनैः संप्राप्तकंथासखो रथ्यायां क्षीणानि अतिजीर्णानि

**रथ्याक्षीणविशीर्णजीर्णवसनैः संप्राप्तकंथासखो निर्मानो निरहंकृतिः शमसु**
**खाभोगैकबद्धस्पृहः ८६ ७ ७ ७**

वसनानि रथ्याक्षीणा विशीर्णवसनानितैः कृत्वा संप्राप्ता कंथासखी सहायिनी येन सः पुनः की
दृशः जनः निर्मानः पुनः कीदृशः निरहंकृतिर्निरहंकारः पुनः कीदृशः जनः शमसुखाभोगैकबद्ध
स्पृहः शमस्य सुखं शमसुखं तस्याभोगे विस्तारे एकाबद्धा स्पृहा येन सः ८६ ७

 

मातरिति हे मातः हे मेदिनि हे तात हे मारुत हे तेजः हे खबंधो हे जल हे भ्रातर्व्योम भवतां पंचत
तानामेषः प्रणामांजलिः बद्धोस्ति तथा विधेयं यथा परे ब्रह्मणि लीये लीनो भवामि कथंभूतोहं यु
ष्मत्संगवशोपजातसुकृतोद्रेकस्फुरन्निर्मलज्ञानापास्तसमस्तमोहमहिमा युष्माकं संगवशस्तेन

मातर्मेदिनि तात मारुत सखे तेजः सुबंधो जल भ्रातर्व्योम निबद्ध एव भवता
मेष प्रणामांजलिः युष्मत्संगवशोपजातसुकृतोद्रेकस्फुरन्निर्मलज्ञानापास्त
समस्तमोहमहिमा लीये परे ब्रह्मणि ८७

युष्मत्संगवशेन उपजातो योसौ सु-
कृतोद्रेकस्तस्मात्स्फुरन्निर्मलज्ञानेन अपास्ता निराकृता समस्तो मोहमहिमा येन सः ८७



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यावदिति विदुषा पंडितेन आत्मश्रेयसि मोक्षे तावदेव महान्प्रयत्नः कार्यः यावदिदं कलेवरगृहं
शरीरमंदिरं च स्वस्थं वर्त्तते समाधानपरायणं वर्त्तते चान्यद्यावज्जरा दूरे वर्त्तते अन्यदिंद्रियश
क्तिः अप्रतिहता वर्त्तते चान्यद्यावदायुषः क्षयो नास्ति तावदेव स्वहिते यत्नः कार्यः भवने गृहे

यावत्स्वस्थमिदं कलेवरगृहं यावच्च दूरे जरा यावच्चेंद्रियशक्तिरप्रतिहता याव
त्क्षयो नायुषः आत्मश्रेयसि तावदेव विदुषा कार्यः प्रयत्नो महान्प्रोद्दीप्ते भवने च
कूपखनने प्रत्युद्यमः कीदृशः ८८ नाभ्यस्ता भुवि वादिवृंददमनी विद्या विनीतोचिता
खड्गाग्रैः करिकुंभपीठदलनैर्नाकं न नीतं यशः

उद्दीप्ते सति निश्चितं कूपखनने कीदृशः
प्रत्युद्यमः न तु गृहे प्रदीप्ते सति कूपः खनितुं शक्यते ८८ नेति भुवि पृथिव्यां विद्यान अभ्यस्ता किं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

 

भूता विद्यावादिवृंददमनी पुनः किंभूता विद्याविनीतोचिता विनयवतः पुरुषस्य योग्या खड्गाग्रैः कृ
पणधाराभिः यशो नाकं स्वर्गलोकं प्रतिननीतं कीदृशैः खड्गाग्रैः करिकुंभपीठदलनैः करिणां कुंभपी
ठदलने शीलं येषां ते तथा तैश्चान्यच्चंद्रोदये कांता कोमलपल्लवाधररसो न पीतः अहो इति खेदे तारु

कांताकोमलपल्लवाधररसः पीतो न चंद्रोदये तारुण्यं गतमेव निष्फलमहो शू
न्यालये दीपवत् ८९ ज्ञानं सतां मानमदादिनाशनं केषांचिदेतन्मदमानकारणम्

ण्यं यौवनं निष्फलमेव गतं किंवत् शून्यालये दीपवत् ८९ ज्ञानमिति सतां सत्पुरुषाणां ज्ञानं मा
नमदादिनाशनं भवति केषांचिदधमानां एतज्ज्ञानं मदमानकारणं भवति अनुक्तमेवार्थं कवि
र्दर्शयति तेन दृष्टयति योगिनां मुनीनां विविक्तं स्थानं एकांतप्रदेशः विमुक्तये भवति संसारच्छेद



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नाम स्यात्कामातुराणां पुरुषाणां विविक्तं जनरहितं अति काम कारणं भवति काम विकारायस्था
त् ९० जीर्णाइति मनोरथाः स्वहृदयेजीर्णा एवयौवनं जराव्याप्तं हं तो ति खेदे चान्य द्रुणा वंध्य
फलतां गुणज्ञैर्विनायाता अक्षमी बलवान्कालोयमः सहसाभ्युपैति हि निश्चितं आम मेना नृभा

स्थानं विविक्तं यमिनां विमुक्तये कामातुराणामतिकामकारणम् ९० जीर्णा एवम
नोरथाः स्वहृदये यातं जरा यौवने हंतांगेषु गुणाश्च वंध्य फलतां याता गुणज्ञैर्विना
किं युक्तं सहसाभ्युपैति बलवान्कालः कृतांतोऽक्षमी ह्याज्ञातं स्मरशासनांघ्रियु
गलं मुक्त्वास्ति नान्या गतिः ९१

येन ज्ञातं त्रिपुरांतकांघ्रियुगलं मुक्त्वा अन्या गतिर्नास्ति
किंभूतः कालः कृतांतः कृतः अंतो येन स कृतांतः ९१ ७ ७

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तृषेति प्राणी सलिलं पानीयं पिबति क सति आस्ये वदने तृषा शुष्यति सति किंभूतं सलिलं स्वादु
सुरभि प्राणी क्षुधार्त्तः सन् शालीन् कवलयति कीदृशान् शालीन् शाकादिवलितान् किंभूतः प्राणी रा
गाग्नौ प्रदीप्ते सति सुदृढतरं यथा भवति वधूं भार्यां आश्लिष्यति आलिंगति जनः प्राणी व्याधेः प्रती

तृषा शुष्यत्यास्ये पिबति सलिलं स्वादु सुरभि क्षुधार्त्तः सन् शालीन् कवलयति शाका
दिवलितान् प्रदीप्ते रागाग्नौ सुदृढतरमाश्लिष्यति वधूं प्रतीकारो व्याधेः सुखमिति
विपर्यस्यति जनः ९२ स्नात्वा गांगैः पयोभिः शुचिकुसुमफलैरर्चयित्वा विभो त्वां ध्ये
ये ध्यानं नियोज्य क्षितिधरकुहरग्रावपर्यंकमूले

कारः उपचारः सुखमिति विपर्यस्यति वि
पर्यासं करोति ९२ स्नात्वेति हे स्मरारे कदा दुःखान्मोक्षे किं कृत्वा गांगैः पयोभिः स्नात्वा हे विभो त्वा





For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न्यतृत्वाशफलैरकुसुमफलैरन्नैर्यित्वाक्षितिधरकुहरग्रावपर्यंकमूलेध्येयेकर्मणिध्यानंनिवेश्यक्षि
तिधरस्यकुहरांक्षितिधरकुहरंतस्ययद्ग्रावंतदेवपर्यंकंतस्ययन्मूलंतास्मिन्ंकिंभूतोहंआत्मारामः
पुनः किंभूतो ऽफलाशीपुनःकिंभूतः त्वत्प्रसादाद्गुरुवचनरतः पुनः किंभूतः ध्यानमार्गैकप्रश्नः पु

आत्मारामोऽफलाशीगुरुवचनरतस्त्वत्प्रसादात्स्मरारे दुःखान्मोक्ष्येकदाहंतव
चरणरतोध्यानमार्गैकप्रश्नः१२ शैय्याशैलशिलागृहंगिरिकुहावस्त्रंतरूणांत्वचः
सारंगाःसुहृदोननुक्षितिरुहांवृत्तिःफलैःकोमलैः

नः किंभूतः तवचरणरतः१२ शय्ये
ति येषांपुरुषाणांएवंविधास्थितिः तान् अहंएवंमन्येतएवपरमेश्वराः साकास्थितिः शैल
शिला शय्यागिरिगुहागृहंतरूणांत्वचः वस्त्रंसुहृदः सारंगाः ननुनिश्चितंक्षितिरुहाणांवृत्

४४ १

शाणांकोमलैः फलैर्हीनैः निर्झरमंबुपानं एवं निश्चयेन रत्येव स ह्रोचिता अंगना इव विद्या येषा
मिति ते ईश्वराः यैः शिरसि सेवांजलिर्न बद्धः ९४ सत्यामिति हि निश्चितं यादृशे न दुःस्थे स्वकीये कुटुं
बे अनुकंपां कृपां नाविभृयात् यत्तदोर्नित्यः संबंधइतिन्यायात् तदा कोयं विद्वान् अतीव दुःस्था-

**येषां निर्झरमंबुपानमुचितं रत्येव विद्यांगना मान्येते परमेश्वराः शिरसि यैर्बद्धो न सेवांजलिः ९४ सत्यामेव त्रिलोकीसरिति हरशिरश्चुंबिनीवच्छटायां सद्वृत्तिं कल्पयंत्यां वटविटपभवैर्वल्कलैः सत्फलैश्च**

सिकानां नारीणां वक्रं वीक्ष्यते अपि तु कोपि
नकथाधिपत्तिज्वररसेन जनिता रुक् तया कस्यां सत्यां त्रिलोकीसरिति गंगायां सत्यामेव त्रिभूता 
यां सरिति हराशिरश्चुंबिनीवच्छटायां हरशिरश्चुंबिनी ईश्वरमस्तकस्य रमणीवच्छटा वपदेशोय

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्याः सा पुनः किंभूतायां त्रिलोकीसारिति सदृत्तिं सदावरं कल्पयंत्यां प्रेरयंत्यां कैः सत्फलैः किंभूतैः सत्फलैः वटविटपभवैर्वटवृक्षोद्भवैः १५ उद्यानेष्विति तां काशीं परिहृत्य परित्यज्य हंत इति खेदे

कोयं विद्वान्नपि पत्तिज्वरजनितरुजातीवदुःखासिकानां वक्त्रं वीक्ष्येन दुःस्थेय
दि हि न बिभृयात्स्वे कुटुंबेनुकंपां १५ उद्यानेषु विचित्रभोजनविधिस्तीव्रातितीव्रं
तपः कौपीनावरणं स्रुवस्त्रमाभितं भिक्षाटनं मंडनम् आसन्नं मरणं च मंगलस
मं यस्यां समुत्पद्यते नेतां काशीं परिहृत्य हंत विबुधैरन्यत्र किं स्थीयते १६ बुधैः किं अन्य

त्र स्थीयते अपि तु न यस्यां काश्यां उद्यानेषु विचित्रभोजनविधिः चान्यत्तीव्राति तीव्रं तपः चान्यत् स्रु
वस्त्रं कौपिनावरणं मंडनं चान्यद्यस्यां अमितं भिक्षाटनं यस्यां काश्यां मंगलसमं आसन्नं मरणं समुत्पद्यते
तां काशीं मुक्त्वा अन्यत्र कथं स्थीयते १६

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नायमिति यदिप्रभुः स्वामीयेषांवचोद्वारेषुश्रुत्वाद्रक्ष्यतिकुप्यतिइति किंनायंतेसमयःप्रतिप्रस्ता
वोनास्तिअधुनारहस्यंमंत्रालोचनाद्यःस्वामीनिद्रातिनिमीलनंकुरुतेरेचेतस्त्वान्प्रभून्प्रहायवि
भ्वेशितुः परमेश्वरस्यमहेशस्यभवनंयाहिकिंभूतंभवनंनिर्दौवारिकनिर्दयोन्त्यपरुषंनिर्गतोदौ

नायंतेसमयोरहस्यमधुनानिद्रातिनाथोयदिस्थित्वाद्रक्ष्यतिकुप्यतिप्रभुरिति
द्वारेषुयेषांवचःचेतस्त्वानपहायथाहिभवनंदेवस्याविभ्वेशितुर्निर्दौवारिकनिर्दयो
न्त्यपरुषंनिःसीमशर्मप्रदं १७

वारिकोयस्मात्तत्निर्दौवारिकंप्रतीहाररहितंनिर्दयोन्त्याक
रोरोन्त्याःपरुषाःयस्मिन् तन्निर्दयोन्त्यपरुषंनिर्दौवारिकंचतत्निर्दयोन्त्यपरुषंचनिर्दौवारिकोन्त्यप
रुषंतत्पुनःकिंभूतंनिःसीमशर्मप्रदंसीमारहितंशर्मसौख्यंप्रददातीति अतिनिर्मलसौख्यदायकं १७



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रियसखीति हे प्रियसखि खलो विधिः पराङ्मुखो दैवः नो जानीमः अत्र इदानीं किं विधास्यति अयं विधिः चिंताचक्रे निधाय बलात् पिंडीकृत्य मनो भ्रमयति किंभूते चिंताचक्रे विपद्दंडव्रातप्रतापपरंपराप-रिच्चपले विपद्दंडव्रातः तस्य यः प्रताप परंपरा तया परिच्चपलं चपलं तस्मिन् मनः कामिव मृदामिवाविधिः कइव

प्रियसखि विपद्दंडव्रातप्रतापपरंपरापरिच्चपले चिंताचक्रे निधाय विधिः खलः
मृदामिव च बलात् पिंडीकृत्य प्रगल्भकुलालवत् भ्रमयति मनो नो जानीमः किमत्र
विधास्यति ९८ महेश्वरे वा जगतामधीश्वरे जनार्दने वा जगदंतरात्मनि

प्रगल्भकुलालवत् यथा प्रगल्भकुलालः मृदं मृत्तिकां बलात् पिंडीकृत्य चक्रे निधाय भ्रमयति एतावता विपरीतं विधेः विलसितं कोपि न वेत्ति ९८ महेश्वरे वेति मे मम महेश्वरे वाथवा जनार्दने वासुदेवे वस्तुतः

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भेदस्य प्रतिपत्तिर्नास्ति किंभूते महेश्वरे जगतामधीश्वरे त्रिभुवनस्याधिपतौ कीदृशे जनार्द्दने जग
दंतरात्मनि जगतां विश्वत्रयाणां अंतरात्मा जगदंतरात्मा तस्मिन् उभयोर्देवयोर्मम मन्ये तस्यं तरंना
स्ति एवं भवामि तथापि तरुणेंदुशेखरे श्रीमहेशे मे भक्तिः ९९ रे इति रे कंदर्प कोदंडटंकारवैः करं

तयोर्न भेदः प्रतिपत्तिरस्ति मे तथापि भक्तिस्तरुणेंदुशेखरे ९९ रे कंदर्प्प करं कद
र्थयासि किं कोदंडटंकारवै रे रे कोकिल कोमलैः कलरैवैः किं त्वं वृथा जल्पासि

किं कदर्थयासि रे रे कोकिल कोमलैः कलरवैः पंचमस्वरैः किं त्वं वृथा जल्पासि हे मुग्धे तव कटा
क्षैरलं पूर्यतां किंभूतैः कटाक्षैः स्निग्ध विदग्धश्च मधुरश्च क्षेपो येषां तैः भवता पूर्वो-
क्तानां कृतं निखिलं अपि व्यर्थं तस्माच्चेतश्चुंबितचंद्रचूडचरणध्यानामृतं वर्त्तते चुंबितं-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चंद्रचूडस्यमहेशस्यचरणध्यानामृतंयेनतत् चुंबितचंद्रचूडचरणध्यानामृतम् १०० कौपीन
मिति योगीसर्वसंगपरित्यागीसुखंतिष्ठति किंभूतोयोगीध्वस्ताशेषमदप्रमादमुदितः ध्व-
स्तानिराकृता अशेषाःमदप्रमादास्तैर्मुदितः कीदृशी कंथापुनः तादृशीपूर्वोक्ताशतखंडजर्ज्ज

मुग्धेस्निग्धविदग्धक्षेपमधुरैर्लोलैःकटाक्षैरलंचेतश्चुंबितचंद्रचूडचरणध्या
नामृतंवर्तते १०० कौपीनंशतखंडजर्ज्जरतराकंथापुनस्तादृशीनिश्चिंतं-
सुखसाध्यभैक्ष्यमशनंशय्याश्मशानेवने रतरानिश्चितं अशनंकिंभूतं अशनं

सुखसाध्यभैक्ष्यं सुखेनसाध्या एवंविधायाभिक्षातत् समुत्पन्नं अन्यच्च शय्याश्मशाने
वनांतेययापिमित्रामित्रसमानतामित्रश्चअमित्रश्च मित्रामित्रौ तयोः सादृश्यंसामान्यंय-

For Private and Personal Use Only

भ॰वै॰
४७

स्याः अथपश्चात्शून्यालये अतिविमलानिर्मलाशुद्धाध्यानलक्षणाचिंता अतः कारणात् यो
गीनित्यमुक्तः संसारेसुखंतिष्ठति १०१ भोगेतिरेलोकाः चेष्टितैर्नवनवाविकल्पापारैः कृ
तंपूर्यंतांयादिन्नेदस्मद्वतः श्रद्धेयं श्रद्धायोग्यंतदास्वधामानिस्वकीये शरीर मंदिरे कामोच्छित्ति

मित्रामित्रसमानतातिविमलाचिंतातिशून्यालये ध्वस्ताशेषमदप्रमादमु
दितोयोगीसुखंतिष्ठति १०१ भोगाभंगुरवृत्तयोबहुविधास्तैरेवचायंभव
स्तत्कस्यैवकृते परिभ्रमतरे लोकाः कृतंचेष्टितैः
व शेकं दर्पजयार्थं केवलं

चेतः समाधीयतां किंभूतंचेतः आशापाशशतोपशांतिविशदं आशापाशस्य शतं आ
शापाशशतंतस्योपशांत्याविशदंनिर्मलंयतो भोगाभंगुरवृत्तयः भंगुराविनश्वरावृत्तिर्येषां

श॰
२

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ते किंभूताः भोगाः बहुविधा अनेकप्रकारा एव निश्चयेन बहुविधैर्भोगैरयं भवः संसार एव
रे लोकाः नत्तस्मात्कारणात्कस्य कृते परिभ्रमत भ्रमणं कुरुत १०२ धन्यानामिति धन्या-
नां मनुष्याणां एवंस्थित्या आयुः क्षीयते किंभूतानां धन्यानां गिरिकंदरे निवसतां किं कुर्वतां

आशापाशशतोपशांतिविशदं चेतः समाधीयतां कामोच्छित्तिवशोस्वधाम
नियदिश्रद्धेयमस्मद्गतः १०२ धन्यानां गिरिकंदरे निवसतां ज्योतिः परं
ध्यायतामानंदाश्रुजलं पिबंति शकुना निःशंकमंकेशयाः

रं ज्योतिः ध्यायतां ये
षां धन्यानामानंदाश्रुजलं निःशंकं शंकारहितं शकुनाः पक्षिणः पिबंति किंभूताः शकु
नाः अंकेशया उत्संगसमारूढाः तु पुनरस्माकमधन्यानां आयुरेवं मनोरथैः परिक्षीयते किं भू

तानामस्माकं प्रासादवापीतटक्रीडाकाननकेलिकौतुकजुषांउपरचितायाः प्रासादवापीतटक्री
डाकाननकेलयस्तासांकौतुकंजुषंतीति प्रासादवापीतटक्रीडाकाननकेलिकौतुकजुषः तेषाम्
१०३ आघ्रातमिति एभिः प्रकारैः किंनग्रस्तं अन्यच्च केजनानग्रस्ता मरणेन जन्म आघ्रातं स्पृष्टं

अस्माकंनुमनोरथोपरचितप्रासादवापीतटक्रीडाकाननकेलिकौतुकजुषा
मायुःपरिक्षीयते १०३ आघ्रातंमरणेनजन्मजरयाविद्युच्चलंयौवनंसं
तोषोधनलिप्सयाशमसुखंप्रौढांगनाविभ्रमैः

धनलिप्सया संतोष आघ्रातः
प्रौढांगनाविभ्रमैः शमसुखं आघ्रातं निरस्तं मत्सरिभिर्लोकैर्गुणा आघ्राता विनाशिताः
व्यालैः दुष्टसर्पैर्वनभुव आघ्राताः दुर्जनैर्नृपाः भूपाला आघ्राता ग्रस्ताः विभूतिरपि अस्थै-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यैर्णा आघ्राता अपहृता तर्हि कालेन नाकिं किं नष्टं किं किं ना विनश्यति अपितु सर्वं नश्यत्येव
१०८ आधीति नाम इति संबोधने तर्हि किं यान्निरंकुशेनाविधिना दैवेन स्फास्थितं निर्मितं किंन
इद शरीरे आधिव्याधिशतैरनितमतिशयेन आरोग्यमुन्मूल्यते तत्र आधिर्मानसी पीडा व्याधिः

लोकैर्मत्सारिभिर्गुणावन भुवो व्यालैर्नृपादुर्ज्जनैरस्थैर्यैर्णा विभूतिरप्यपहृताग्र
स्तं न किं केनवा १०८ आधिव्याधिशतैर्जनस्याविविधैरारोग्यमुन्मूल्यते ल
क्ष्मीर्यत्रपतंति तत्र विवृत द्वारा इव व्यापदः रोग समुद्भवाचान्यद्यस्मिन् दैवानि

र्माणे लक्ष्मीः तत्र स्थाने वर्त्तते व्यापदः विवृत द्वारा इवोद्घाटितकपाटा इव वर्त्तंते अवश्यं
निश्चितं आशु शीघ्रं मृत्युर्जातं जातं उत्पन्नं उत्पन्नं आत्मसात्करोति आत्मा यत्तं विधत्ते अ

For Private and Personal Use Only

भ॰वै॰ नः अस्यदेवस्यनिर्माणे किमपिस्थिरं नास्तीत्यागमः १०५ कृच्छ्रेणोति रे मनुष्यावदनक- श॰
८९ थयत यदिनेत्संसारे स्वल्पमपि सुखं किंचिदस्तिगर्भमध्ये कृच्छ्रेण कष्टेन नियमित तनुभिः २

जातंजातमवश्यमाशुविवशं मृत्युःकरोत्यात्मसात्तात्किंनामनिरंकुशेन
विधिनायन्निर्मितंसुस्थिरं १०५ कृच्छ्रेणामेध्यमध्येनियमित
तनुभिःस्थीयतेगर्भमध्येकांताविश्लेषदुःखव्यतिकरविषमेयौवनेवि-
प्रयोगः

संकोचित शरीरैः स्थीयते किंभूते गर्भमध्ये अमेध्यं मध्यं यस्य तदमेध्य
मध्यं तस्मिन् संसारे यौवनेविप्रयोगः किंभूते यौवने कांता विश्लेष दुःख व्यतिकर विषमे कां ८९
तायाविश्लेषः कांताविश्लेषस्तस्य योसौ दुःखव्यतिकरस्तेन विषमः कांता विश्लेषदुःखव्य

For Private and Personal Use Only

निकरविषमः तस्मिन्नपि पुनर्नारीणामवज्ञावगणनं तेन विलसति अपि पुनर्नियतं निश्चि
तं वृद्धभावः यस्मादसाधुः अस्मात्कारणात्संसारे किमपि सौख्यं नास्ति १०६ आयुरिति

नारीणामप्यवज्ञाविलसति नियतं वृद्धभावोप्यसाधुः संसारे रेमनु
ष्याः वदत यदि सुखस्वल्पमप्यस्ति किंचित् १०६ आयुर्वर्षशतं नृणां
परिमितं रात्रौ तदर्धं गतं तस्यार्द्धस्य परस्य चार्द्धमपरं बालत्ववृद्धत्वयोः
शेषं व्याधिवियोगदुःखसहितं सेवादिभिर्नीयते जीवे वारितरंगचंचल
तरे सौख्यं कुतः प्राणिनाम् १०७

प्राणिनां सौख्यं कुतः कथं नृणां मनुष्याणा
मायुर्वर्षशतं परिमितं तस्यायुषो वर्षशतप्रमाणस्य अर्द्धं रात्रौ गतं शयानस्य ततोनंतरं तत-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्य पंचाशत अर्द्धस्य कदाचिदपि अधिक मर्द्धमपि बालत्व वृद्धत्वयोर्गतं शेषमायुर्व्याधिवियो
गशोकसहितं सेवादिभिः कर्मभिर्नीयते किंभूते जीवे जीवितव्ये वारितरंगचंचलतरंग वा-
रिणः समुद्रस्य तरंगास्त इव चंचलतरं वारितरंगचंचलतरं तस्मिन् १०७ ब्रह्मेति ब्रह्मज्ञानवि

ब्रह्मज्ञानविवेकिनोऽमलधियः कुर्वंत्यहो दुष्करं यन्मुंचंत्युपभोगकांचनध
नान्येकांततो निस्पृहाः न प्राप्तानि पुरा न संप्रति न च प्राप्तौ दृढ प्रत्ययो वस्था
मात्र परिग्रहाण्यपि परं त्यक्तुं न शक्ता वयम् १०८

वेकिनः अमला निर्मला
धी बुद्धिर्येषां ते अहो इत्याश्चर्ये दुष्करं तत्कुर्वंति तत्किं उपभोगान् न भजंति भजंति एवं भू
तानि धनान्यपि मुंचंति त्यजंति अतः एकांततो निस्पृहा विरक्ताः वयं तु पुरा न प्राप्तानि सं



For Private and Personal Use Only

पति अधुनानसंति अग्रेपि प्रासौ द्दढमत्ययो निश्चयो नास्ति एवंभूतानि धनानित्यक्तुं नश
क्ताः कथंभूतानि धनानि वांछा मात्रपरिग्रहो येषां नानि वांछा मात्राणि ननु प्रत्यक्षाणि १०८

व्याघ्रीवातिष्ठतिजरापरितर्ज्जयंतीरोगाश्चशत्रवइवप्रहरंतिदेहं आ
युःपरिस्त्रवतिभिन्नघटादिवांभोलोकस्तथाप्यहितमाचरतीतिचित्रम् १०९

व्याघ्रीव जरा परितर्जयंती अग्रेतिष्ठति रोगाश्च शत्रव इव देहं प्रहरंति आयुश्चभिन्नघटा
दिवयथा अंभः उदकं परिस्त्रवति तथा प्रतिदिनं आयुष्यं क्षीयते एवं सति लोकः अहितं
आचरति इति चित्रं आश्चर्यम् १०९ ६ ६ ६

भ॰ वै॰ सृजतीति अशेषाः समग्रा ये गुणाः शौर्यौदार्य दया दाक्षिण्यादयस्तेषां आकरः खनिः सकल शा॰
५१ गुणोत्पादकमितियावत् भुवः पृथिव्याः अलंकरणं अलंकारः सौभाग्यमिति यावत् एतादृशं पु ३
रुषरत्नं ब्रह्मा सृजति उत्पादयति तदा ब्रह्मणोऽतीवचातुर्यं किंच तत्पुरुषरत्नं तत्क्षणभंगि तनुक्ष

सृजतितावदशेषगुणाकरं पुरुषरत्नमलंकरणं भुवः तदपित
त्क्षणभंगिकरोतिचेदहह कष्टमपंडितताविधेः ११० ॥

पानाशशीलं करोतिचेत्तर्हि अहहेति खेदे कष्टं ननु ब्रह्मणोऽतीवापंडितता मौर्ख्यमित्य
र्थः कुतः स्वारामे स्वयमारोपितान् जलसेचनेन वर्द्धितान् वृक्षान् स्वयं छेत्तुमसमर्थ इति लो ५२
कप्रसिद्धेः ११० श्रीगोपालकृष्णायनमः श्रीमज्जगदीश्वर समर्थ श्रीराम ॥

गात्रमिति गात्रं शरीरं संकुचितं संकोचं प्राप्तं गतिर्गमनं विगलिता नष्टा दंतावलिः दंतपंक्तिः भ्र-
ष्टा पतितेत्यर्थः दृष्टिः अवलोकनं नश्यति अंधत्वं प्राप्तं बधिरता कर्णेंद्रियवैकल्यं वर्धते निकटे

गात्रं संकुचितं गतिर्विगलिता भ्रष्टा च दंतावलिर्दृष्टिर्नश्यति वर्धते बाधि
रता वक्त्रं च लालायते वाक्यं नाद्रियते च बांधवजनो भार्या न शुश्रूषते
हा कष्टं पुरुषस्य जीर्णवयसः पुत्रोप्यमित्रायते ॥१११॥ ७ ॥ ७

उच्चैर्घुष्टमपि न श्रूयते वक्त्रं लालायते लालास्रावं कुरुते बांधवजनः वाक्यं नाद्रियते न सत्क्रि
यते भार्या स्त्री न शुश्रूषते सेवां न कुरुते हा इति खेदे जीर्णवयसः पुरुषस्य कष्टं दुःखं यतः
साक्षात्स्वपुत्रोपि अमित्रायते शत्रुवदाचरतीत्यर्थः ॥१११॥ ७ ॥ ७ ॥ ७

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्षणमिति क्षणंबालोभूत्वाबालः सन् क्षणमपियुवातरुणः सन् कामरसिकः कामेषु विष-
येषु रसिकः निपुणः क्षणंवित्तैर्द्रव्यैर्हीनः दरिद्रः क्षणमपिन्द्रपरिपूर्णविभवः पश्चात् जरया-
जीर्णः अंगैः वलीमंडिततनुः वलिभिर्मंडिता आक्रांतातनुर्यस्य नरः संसारांतेमरणसमये

क्षणंबालोभूत्वाक्षणमपियुवाकामरसिकः क्षणंवित्तैर्हीनः क्षण
मपिन्नसंपूर्णविभवः जराजीर्णैरंगैर्नटइववलीमंडिततनुर्नरः
संसारांतेविशतियमधानीजवनिकाम् ११२ ७ ७

यमधानीजवनिकां यमस्यधानींपुरींप्रविशति यथानटः नानावेषान् दधाति तथायं प्रा
णीनानावस्थांदधाति ११२ श्रीरामचंद्रायनमः ७ ७



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अहौ सर्पे हारे मुक्ताफलहारे वा बलवति रिपौ शत्रौ सुहृदि हितकरे वा मणौ वा लोष्ठे मृत्पिंडे पाषाणे
वा कुसुमशयने पुष्पशय्यायां दृषादि पाषाणे वा तृणे स्त्रैणे अपत्ये वा इत्यादिषु यम समा दृष्टिर्यस्य
समदृशः दिवसाः कदा यांति गच्छंति किंभूतस्य मम क्वचित् कुत्रचित् पुण्यारण्ये स्थित्वा शिवेति

**अहौ वा हारे वा बलवति रिपौ वा सुहृदि वा मणौ वा लोष्ठे वा कुसुमशयने वा दृ**
**षदि वा तृणे वा स्त्रैणे वा मम समदृशो यांति दिवसाः क्वचित्पुण्यारण्ये शिव शि**
**व शिवेति प्रलपतः ११३ इति श्रीभर्तृहरिकृतवैराग्यशतकं संपूर्णम् ७**

नामावलिं प्रलपतः उच्चैः आक्रोशेन वदतः ११३ इति श्रीभर्तृहरिकृतवैराग्यशतकं संपूर्णम् ७
हें पुस्तक मुंबईंत नारायण भि॰ व सखाराम भि कृ शेटे यांनीं आपले छा॰ छा॰ शके १७९८ माघ मास

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इतिभर्तृहरिकृतवैराग्यशतकंसटीकंसमाप्तं.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

Shree Vijaya Dharma Laxmi Gyana Mandir
श्री विजयधर्म
लक्ष्मी ज्ञान मंदिर
आगरा
Belanganj AGRA.

For Private and Personal Use Only